## ३९. संस्कृतसम्भाषणम्

किमर्थम् /कति/ कुतः

शिल्पा - भोः ! भवान् सङ्गणकज्ञानं कुतः प्राप्तवान् ?

नरेन्द्रः - अहम् अमेरिकायां सङ्गणकज्ञानं प्राप्तवान् ।

शिल्पा - भवान् किमर्थं भारतम् आगतवान् ? भवतः जननीजनकौ कुत्र स्तः ?

नरेन्द्रः - मम जननीजनकौ अमेरिकादेशे स्तः । अहं संस्कृत-शास्त्राणाम् अध्ययनार्थं भारतम् आगतवान् । तत्रापि संस्कृतशास्त्राध्ययनाय प्रथमं संस्कृतसम्भाषणं ज्ञातुमिच्छामि । भवती किम् अधीतवती ।

शिल्पा - अहं संस्कृतसाहित्यम् अधीतवती । संस्कृते स्नातकोत्तरपदवीमपि प्राप्तवती । अधुना शोधकार्यमपि करोमि ।

नरेन्द्रः - भवती अत्र कति वर्षेभ्यः कार्यं करोति ?

शिल्पा - अहं त्रयोदशवर्षेभ्यः संस्कृतप्रचारकार्यं करोमि ।

नरेन्द्रः - अत्र संस्कृताध्ययनाय बहुभ्यः प्रदेशेभ्यः जनाः आगच्छन्ति किम् ?

शिल्पा - संस्कृताध्ययनाय विदेशेभ्यः अपि प्रतिवर्षम् आगच्छन्ति, तिष्ठन्ति, पठन्ति च ।

नरेन्द्रः - ते अत्र आगत्य कथम् अध्ययनं कुर्वन्ति ?

शिल्पा - ते अत्र आगत्य पठन्ति । किन्तु मन्दगत्या शिक्षणं भवति । यतः ते शीघ्रम् उच्चारयितुं न शक्नुवन्ति ।

किन्तु मासत्रयं मासचतुष्टयं वा स्थित्वा, सम्यक् ज्ञात्वा गच्छन्ति । अत्रत्येन संस्कृतवातावरणेन अत्यन्तं प्रभाविताः भवन्ति ।

नरेन्द्रः - अहं बहून् विषयान् ज्ञातवान्, धन्यवादः । अहमपि संस्कृतसम्भाषणाभ्यासद्वारा संस्कृतशास्त्राणाम् अध्ययनार्थं परिश्रमं करिष्यामि ।